श्री किरात वाराही स्तोत्रं

अस्य श्री किरात वाराही स्तोत्र महामंत्रस्य – दूर्वासो भगवान् ऋषिः – अनुष्टुप् छंदः – श्री किरात वाराही मुद्रारूपिणी देवता – हुं बीजं – रं शक्तिः – क्लीं कीलकं – मम सर्वशत्रुक्षयार्थं श्री किरात वाराही स्तोत्रजपे विनियोगः |

ध्यानं

उग्ररूपां महादेवीं शत्रुनाशनतत्परां |
क्रूरां किरातवाराहीं वंदेहं कार्यसिद्धये || 1 ||

स्वापहीनां मदालस्यामप्रमत्तामतामसीं |
दंष्ट्राकराळवदनां विकृतास्यां महारवां || 2 ||

ऊर्ध्वकेशीमुग्रधरां सोमसूर्याग्निलोचनां |
लोचनाग्निस्फुलिंगाद्यैर्भस्मीकृत्वाजगत्त्रयं || 3 ||

जगत्त्रयं मोदयंतीमट्टहासैर्मुहुर्मुहुः |
खड्गं च मुसलं चैव पाशं शोणितपात्रकं || 4 ||

दधतीं पंचशाखैः स्वैः स्वर्णाभरणभूषितां |
गुंजामालां शंखमालां नानारत्नविभूषितां || 5 ||

वैरिपत्नीकंठसूत्रच्छेदनक्षुररूपिणीं |
क्रोधोद्धतां प्रजाहंतृ क्षुरिके वस्थितां सदा || 6 ||

जितरंभोरुयुगळां रिपुसंहारतांडवीं |
रुद्रशक्तिं परां व्यक्तामीश्वरीं परदेवतां || 7 ||

विभज्य कंठदंष्ट्राभ्यां पिबंतीमसृजं रिपोः |
गोकंठमिव शार्दूलो गजकंठं यथा हरिः || 8 ||

कपोतायाश्च वाराही पतत्यशनया रिपौ |
सर्वशत्रुं च शुष्यंती कंपंती सर्वव्याधयः || 9 ||

विधिविष्णुशिवेंद्राद्या मृत्युभीतिपरायणाः |
एवं जगत्त्रयक्षोभकारकक्रोधसंयुतां || 10 ||

साधकानां पुरः स्थित्वा प्रवदंतीं मुहुर्मुहुः |
प्रचरंतीं भक्षयामि तपस्साधकते रिपून् || 11 ||

तेपि यानो ब्रह्मजिह्वा शत्रुमारणतत्परां |
त्वगसृङ्मांसमेदोस्थिमज्जाशुक्लानि सर्वदा || 12 ||

भक्षयंतीं भक्तशत्रो रचिरात्प्राणहारिणीं |
एवंविधां महादेवीं याचेहं शत्रुपीडनं || 13 ||

शत्रुनाशनरूपाणि कर्माणि कुरु पंचमि |
सर्वशत्रुविनाशार्थं त्वामहं शरणं गतः || 14 ||

तस्मादवश्यं शत्रूणां वाराहि कुरु नाशनं |
पातुमिच्छामि वाराहि देवि त्वं रिपुकर्मतः || 15 ||

मारयाशु महादेवी तत्कथां तेन कर्मणा |
आपदशत्रुभूताया ग्रहोत्था राजकाश्च याः || 16 ||

नानाविधाश्च वाराहि स्तंभयाशु निरंतरं |
शत्रुग्रामगृहान्देशान्राष्ट्रान्यपि च सर्वदा || 17 ||

उच्चाटयाशु वाराहि वृकवत्प्रमथाशु तान् |
अमुकामुकसंज्ञांश्च शत्रूणां च परस्परं || 18 ||

विद्वेषय महादेवि कुर्वंतं मे प्रयोजनं |
यथा नश्यंति रिपवस्तथा विद्वेषणं कुरु || 19 ||

यस्मिन् काले रिपुस्तंभं भक्षणाय समर्पितं |
इदानीमेव वाराहि भुंक्ष्वेदं कालमृत्युवत् || 20 ||

मां दृष्ट्वा ये जना नित्यं विद्वेषंति हसंति च |
दूषयंति च निंदंति वाराह्येतान् प्रमारय || 21 ||

हंतु ते मुसलः शत्रून् अशनेः पतनादिव |
शत्रुदेहान् हलं तीक्ष्णं करोतु शकलीकृतान् || 22 ||

हंतु गात्राणि शत्रूणां दंष्ट्रा वाराहि ते शुभे |
सिंहदंष्ट्रैः पादनखैर्हत्वा शत्रून् सुदुस्सहान् || 23 ||

पादैर्निपीड्य शत्रूणां गात्राणि महिषो यथा |
तांस्ताडयंती शृंगाभ्यां रिपुं नाशय मेधुना || 24 ||

किमुक्तैर्बहुभिर्वाक्यैरचिराच्छत्रुनाशनं |
कुरु वश्यं कुरु कुरु वाराहि भक्तवत्सले || 25 ||

एतत्किरातवाराह्यं स्तोत्रमापन्निवारणं |
मारकं सर्वशत्रूणां सर्वाभीष्टफलप्रदं || 26 ||

त्रिसंध्यं पठते यस्तु स्तोत्रोक्त फलमश्नुते |
मुसलेनाथ शत्रूंश्च मारयंति स्मरंति ये || 27 ||

ताक्ष्यारूढां सुवर्णाभां जपेत्तेषां न संशयः |
अचिराद्दुस्तरं साध्यं हस्तेनाकृष्य दीयते || 28 ||

एवं ध्यायेज्जपेद्देवीमाकर्षणफलं लभेत् |
अश्वारूढां रक्तवर्णां रक्तवस्त्राद्यलंकृताम् || 29 ||

एवं ध्यायेज्जपेद्देवीं जनवश्यमाप्नुयात् |
दंष्ट्राधृतभुजां नित्यं प्राणवायुं प्रयच्छति || 30 ||

दूर्वास्यां संस्मरेद्देवीं भूलाभं याति बुद्धिमान् |
सकलेष्टार्थदा देवी साधकस्तत्र दुर्लभः || 31 ||

इति श्री किरात वाराही स्तोत्रं संपूर्णं ||